॥ अथ शांतिकाध्याय प्रारम्भः ॥

५८

॥ शां॰का ॥ ॐ श्रीगणेशाय नमः ॥ ॥ नन्दिकेश्वर उवाच ॥ अतःपरमिदं गुह्यं रुद्रो
॥ १ ॥ ड्डीतम्महोदयम् ॥ महाविघ्नप्रशमनं महाशान्तिकरं परम् ॥ १ ॥ अकाल
मृत्युशमनं सर्वव्याधिनिवारणम् ॥ परचक्रप्रमथनं सदाविजयवर्द्धन-
म् ॥ २ ॥ सर्वदेवग्रहाणीकं समभीष्टफलप्रदम् ॥ सर्वशान्त्यधिकारा-
ख्यं धर्मं वक्ष्यामि शाश्वतम् ॥ ३ ॥ शशाङ्कार्द्धधरस्त्र्यक्षो नागयज्ञोप-
वीतकः ॥ चतुर्मुखश्चतुर्बाहुः सितभस्मावगुण्ठितः ॥ ४ ॥ वरो वरेण्यो वर ॥ राम: ॥
दो देवदेवो महेश्वरः ॥ त्रैलोक्यनमितः श्रीमान् शान्तिमाशु करोतु मे ॥ ५ ॥ १ ॥

सर्वायवपूर्णेनगात्रेणातनुमध्यमा ॥ पीतश्यामातिसौम्येनस्निग्ध
वर्णेनशोभमेनाना ॥ ६ ॥ ललाटेतिलकोपेताचन्द्ररेखार्द्धधारिणी ॥ चित्रां
बरधरादेवीसर्वाभरणभूषिता ॥ ७ ॥ वरस्त्रीमयरूपेणशोभागुणाम
हास्पद् ॥ भावनामात्रसन्तुष्टा उमादेवीवरप्रदा ॥ ८ ॥ साक्षादगस्त्य
रूपेणशान्तेनामिततेजसा ॥ शांतिंकरोतुमेश्रीताभक्तानांभक्तवत्स
ला ॥ ९ ॥ पद्मरागद्युतिः सौम्योरक्तमाल्यानुलेपनः ॥ आवालेवा
लरूपेणषड्वक्त्रः सिखिवाहनः ॥ १० ॥ पूर्णेन्दुवदनः सौम्यस्त्रिशिखः

॥शां·का॥ शक्तिसंयुतः॥ कृत्तिकोमाग्निरूढाङ्ग·समुद्भूतः सुरार्चितः॥ ११॥ का
॥ २ ॥ र्त्तिकेयो महातेजा वरदानैकतत्परः॥ शांतिं करोतु मे नित्यं बलं सौख्य
श्च मे सदा॥ १२॥ श्वेतवस्त्रपरिधानस्त्र्यक्षः कनकसुप्रभः॥ शूलपाणि
र्महाप्राज्ञो नन्दीशः शिवभावितः॥ १३॥ शिवार्चनपरो नित्यं शिवध्याने
कतत्परः॥ शांतिं करोतु मे शान्तो धर्मो धर्मे च सुन्नमम्॥ १४॥ महोदरो म ॥ग्र.॥
हाकायः स्निग्धाञ्जनचयच्छविः॥ एकदंष्ट्रोत्कटो देवो गजवक्त्रो म ॥ २ ॥

हावलः ॥ १५ ॥ नागयज्ञोपवीतीचनागाभरणभूषितः ॥ सर्वार्थसंपदा
धारोगणाध्यक्षोवरप्रदः ॥ १६ ॥ रुद्रस्यतनयोदेवोनायकोथविना
यकः ॥ करोतुमेमहाशांतिंकर्मसिद्धिंचसर्वदा ॥ १७ ॥ इन्द्रनीलनिभ
स्वक्षोदीप्तश्रूलायुधोधृतः ॥ रक्ताम्बरःश्रीमान्कृष्णंगोनागभूषणः
॥ १८ ॥ पापायनोदमतुलमलक्ष्मीमलनाशनम् ॥ करोतुमेमहाशांतिं
महाकालोमहावलः ॥ १९ ॥ पीतवस्त्रपरिधानाकन्यारूपास्वलंकृता

॥शांङ्का॥ गणमातांविकाब्रक्षाप्रलयागौरीसुरेश्वरी ॥२०॥ सर्वसिद्धिकरी
॥ ३ ॥ देवीप्रसादपरमापरा ॥ शांतिंकरोतुमेमातासिद्धिंचानुप्रयच्छतु ॥२१॥
स्निग्धश्यामेनवर्णेनमहामहिषमर्द्दिनी ॥ धनुश्चक्रप्रहरणखड्ग
पट्टिशधारिणी ॥२२॥ आतर्जन्युघतकरासर्वोपद्रवनाशिनी ॥ सर्वम
ङ्गलमातामेशिवमाचरतुध्रुवम् ॥२३॥ निर्मांसेनशरीरेणस्नायुवस्थि ॥ एम
धुनिवन्धन ॥ अतिसूक्ष्मोतिवक्रांतश्चक्षोभंगीरिटिर्महान ॥२४॥ रु ॥ ३ ॥

द्रात्मजो महावीरो रुद्रैकाहितमानसः ॥ सोपि मे शान्तभावेन शान्ति
माशु प्रयच्छतु ॥ २५ ॥ षष्ठचण्डगणसैन्येशो महाटंकास्त्रधारकः ॥ अ
क्षमालार्पितकरश्चाक्षश्चण्डेश्वरो वरः ॥ २६ ॥ चण्डं पापापहरणो ब्र
ह्महत्यादिशोधकः ॥ करोतु मे महायोगी कल्याणानां परंपराम् ॥ २७ ॥
शंखकुन्देन्दुतुल्याभः करोद्भमकरतत्प्रभः ॥ अक्षमालाशिवाग्रस्थः
स्वयंज्ञानव्यवस्थितः ॥ २८ ॥ चतुर्मुखश्चतुष्पादस्त्रिनेत्रः सर्वदेहवा
न् ॥ क्षितिपतिर्वृषो देवो धर्मो धर्मसमोत्तमः ॥ २९ ॥ ईन्दुं वहति पृष्ठेन त

॥शां·का॥ स्याधर्मोजगत्प्रभु॥ वृषोवृषध्वजः श्रीमानकरोतुममशांतिकम॥ ३०॥
॥ ८ ॥ पद्मासनःपद्मनिभश्चतुर्वदनपंकजः॥ कमण्डलुधरःश्रीमानदेवग
न्धर्वपूजितः॥ ३१॥ शिवध्यानैकपरमःशिवसद्भावभावितः॥ ब्रह्मश्र
द्धेनदिव्येनब्रह्मशांतिंकरोतुमे॥ ३२॥ ताक्ष्यासनश्चतुर्वाहुःशंखचक्रग
दाधरः॥ श्यामपीतांवरधरोमहावलपराक्रमः॥ ३३॥ यज्ञदेहोत्तमोदे
वोमाधवोमधुसूदन॥ शिवप्रसादसंपन्नःशिवध्यानपरायणः॥ ३४॥ रामः॥
सर्वपापप्रमथकःसर्वासुरनिकृन्तकः॥ सर्वदाशान्तभावेनविष्णुःशा॥ ८॥

न्तिंकरोतुमे ॥ ३५ ॥ अर्हश्च शान्तरूपश्च शिखिस्कन्धैकपारिकः ॥ दि
ग्वासामलपंकश्च सौम्यचित्तः समाहितः ॥ ३६ ॥ सम्वर्त्तस्तेन शान्तः
शिवज्ञानैकचिन्तकः ॥ शांतिंकरोतुमेशान्तः शिवयोगेनभावितः ॥ ३७ ॥
जितेन्द्रियः समाधिस्थः पात्रचीवरभूषितः ॥ वरदोभयपाणिश्च ज्ञान
ध्यानरतः सदा ॥ ३८ ॥ योगदृष्टिसदायुक्तः शिवज्ञानेनभावितः ॥ शां
न्तिंकरोतुमेदेवः सर्वसत्त्वहितेरतः ॥ ३९ ॥ पीतवर्णेनदेहेनहारेण
सुविचित्रिता ॥ सर्वांगसुन्दरी देवीविजयाजयकारिणी ॥ ४० ॥ शिवा

॥शां॰ का॥ र्चनरतानित्यंशिवजाप्यपरायणा ॥ धारिणी लोकपालाश्चनित्यंरक्षांकरो
॥ ५ ॥ तुमे ॥ ४१ ॥ नन्दाभद्राचसुरतीसुशीलाश्चसुमनास्तथा ॥ क्षीरोदादुत्थिता
गावोलोकानांहितकाम्यया ॥ ४२ ॥ प्रीणयन्तीसदादेवान्‌विप्रांश्चै
वविशेषतः ॥ नित्यन्तुदेवतात्मानः कुर्वन्तुममशांतिकम्‌ ॥ ४३ ॥ पद्म
रागप्रभादेवीचतुर्वदनपंकजा ॥ अक्षमालार्पितकराकमण्डलुध
राशुभा ॥ ४४ ॥ ब्रह्माणीसौम्यवदनाशिवपूजापरायणा ॥ शान्तिक ॥राम:॥
रोतुमेप्रीताब्रह्मशब्देनसर्वदा ॥ ४५ ॥ हिमशैलनिभादेवीमहावृषभ ॥ ५ ॥

वाहना ॥ त्रिशूलहस्तावरदानागाभरणभूषिता ॥ ४६ ॥ चतुर्भुजाच
तुर्वक्त्रात्रिनेत्रापापहारिणी ॥ आर्त्तिंहरतुमेप्रीतारुद्राणीनित्यमु
ज्ज्वला ॥ ४७ ॥ मयूरवाहनादेवीसिन्दूरारुणविग्रहा ॥ शक्तिहस्ता
महारूपासर्वालङ्कारभूषिता ॥ ४८ ॥ रुद्रभक्तामहावीर्यारुद्रार्चनर
तासदा ॥ कौमारीवरदादेवीशान्तिमाशुददातु ॥ ४९ ॥ शंखचक्रगदा
हस्ताश्यामापीताम्बरप्रिया ॥ चतुर्भुजातार्क्ष्ययानावैष्णवीसुरपूजि
ता ॥ ५० ॥ शिवार्चनरतानित्यंशिवैकाहितमानसा ॥ शान्तिंकरोतुमेनि

॥श्रा॰का॥ त्वं सर्वासुरविमर्द्दिनी ॥ ५१ ॥ ऐरावतगतारूढा वज्रहस्ता महाबला

॥ ६ ॥ नेत्राणां तु सहस्रेण भूषिता कनकप्रभा ॥ ५२ ॥ सिद्धगंधर्वनिरता

सर्वालंकारभूषिता ॥ ऐन्द्री देवी सदा कालं शान्तिमाशु करोतु मे ॥ ५३ ॥

वराहघोरा विकरा वराहवरवाहना ॥ श्यामावदाता विपुला शंखचक्र

गदायुधा ॥ ५४ ॥ तर्जयन्ती सदा विघ्नानर्चयन्ती सदा शिवम् ॥ वारा

ही वरदा देवी क्षेमारोग्यं ददातु मे ॥ ५५ ॥ ऊर्ध्वकेशी कोटराक्षी निर्मां ॥ स्ना

सा स्नायुबन्धना ॥ करालवदना घोरा खड्गकंकाघता ॥ ५६ ॥ कपा ॥ ६ ॥

समालिनीकुठारखट्वांगवरधारिणी ॥ आरक्तपिंगनयनागजचर्मावगु
ण्ठिता ॥ ५७ ॥ नानानागोपवीताढ्या प्रेतस्थाननिवासिनी ॥ शिवरूपेणघो
रेणशिवारावभयंकरी ॥ ५८ ॥ चामुण्डाचण्डरूपेणमहारक्षांकरोतुमे
॥ आपीतेनशरीरेणनानाभरणभूषिता ॥ ५९ ॥ आतर्जयन्तीविघ्नानी
ज्वलत्खट्वांगधारिणी ॥ ध्वांक्षासनामहावीरासर्वपापप्रणाशिनी ॥ ६० ॥
लम्बोष्ठीवरदादेवीशान्तिमाशुकरोतुमे ॥ आकाशमातरोदेव्यस्तथा
न्यालोकमातरः ॥ ६१ ॥ भूतानांमातरःसर्वास्तथान्याःसुरमातरः ॥ सर्व

शा·का· ॥ मातृमहादेव्यः स्वायुधव्यग्रपाणयः ॥ ६२ ॥ जगद्व्याप्यावतिष्ठन्ते
॥ ७ ॥ बलिकामास्सहोदया ॥ रुद्रभक्ता महावीर्या रुद्रार्चाहितमानसाः
॥ ६३ ॥ शान्तिं कुर्वन्तु मे नित्यं मातरः सुरपूजिताः ॥ ये रुद्रा रौद्रकर्मा
णो रुद्रस्थाननिवासिनः ॥ ६४ ॥ सौम्याश्चैव तु ये केचित्स्थाणुस्था
ननिवासिनः ॥ मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ॥ ६५ ॥ विघ्न
भूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः ॥ सर्वे सुप्रीतमनसः प्रति
गृह्णन्तु मे बलिम् ॥ ६६ ॥ सिद्धिमाशु प्रयच्छन्तु भयेभ्यः पान्तु मां सदा ॥ एम· ॥
॥ ७ ॥

ऐंद्र्यादिशिगणायेतुवज्रहस्तामहाबला: ॥ ६७ ॥ सुश्वेताक्षा:श्वेतनि
भास्तथावैश्वेतलोहितादिव्यान्तरिक्षभौमाश्च पातालतलवासिन:
॥ ६८ ॥ रुद्रार्चनरताहृष्टा शान्तिंकुर्वंतु मेसदा ॥ आग्नेयांयागणा:स
र्वे श्रुवहस्तानिषंगिण: ॥ ६९ ॥ आरक्ताक्षारक्तनिभास्तथावैरक्तलो
हिता: ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिन: ॥ ७० ॥ रुद्रस्मरण
मनिरता:शांतिंकुर्वंतु मेसदा ॥ याम्यान्दिशिगणायेतुसततंदण्डपा
णय: ॥ ७१ ॥ कृष्णा:कृष्णनिभा:कृष्णास्तथावैकृष्णलोहिता: ॥ दिव्या

॥शा॰का॰॥न्तरिक्षभौमाश्च पातालतलवासिनः ॥ ७२ ॥ रुद्रकाहितचेतस्काः शांतिं
॥ ८ ॥ कुर्वन्तु मे सदा ॥ नेहत्यानुगणाः क्रूरा राक्षसा मत्स्यरूपिणः ॥ ७३ ॥ सुनी
लाक्षानीलनीभास्तथा वै नीललोहिताः ॥ दिव्यान्तरिक्षभौमाश्च पाता
लतलवासिनः ॥ ७४ ॥ रुद्रकध्याननिरताः शांतिं कुर्वंतु मे सदा ॥ वारुण्यां
वै गणा ये नु सततं पाशपाणयः ॥ ७५ ॥ सुश्यामाक्षाः श्यामनिभास्तवैश्या
तमलोहिताः ॥ दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ॥ ७६ ॥ परमेशा
र्चनरताः कुर्वंतु मम शांतिकम् ॥ वायव्यां तु गणा ये वै सततं ध्वजपाणा ॥ श्म॰ ॥
॥ ८ ॥

प: ॥ ७७ ॥ सुपीताक्षाः पीतनिभास्तथावैपीतलोहिताः ॥ दिव्यान्तरिक्ष
भौमाश्च पातालतलवासिनः ॥ ७८ ॥ शिवभक्तिपराः सर्वे क्षेमंकुर्वन्तु मे
सदा ॥ उत्तरस्यां गणायेत्तु सन्ततं निधिपाणयः ॥ ७९ ॥ शवलाक्षाः
शवलनिस्तथाद्धावल लोहिताः ॥ दिव्यान्तरिक्षभौमाश्च पातालत
लवासिनः ॥ ८० ॥ शिवपूजासमुद्युक्ताः क्षेमंकुर्वन्तु मे सदा ॥ ऐशान्यां
वैगणायेत्तु प्रशान्ताः शूलपाणयः ॥ ८१ ॥ सुसूक्ष्माः सूक्ष्मसहशास्तथा
वैसूक्ष्मलोहिताः ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः ॥ ८२ ॥

॥ शां-का ॥ शिवपूजासमुद्युक्ताः क्षेमंकुर्वन्तु मे सदा ॥ अधोभागे गणा ये तु सततं शू
॥ ९ ॥ लपाणयः ॥ ८३ ॥ धूम्रा धूम्रनिभाः सर्वे तथा वै धूम्रलोहिताः ॥ दिव्यान्त
रिक्षभौमाश्च पातालतलवासिनः ॥ ८४ ॥ शिवंकुर्वन्तु मे निमलक्ष्मीम
लनाशनम् ॥ ऊर्ध्वभागगणा ये तु महाबलपराक्रमाः ॥ ८५ ॥ सुसूक्ष्माः
सूक्ष्मनिलभास्तथा वै सूक्ष्मलोहिताः ॥ दिव्यांतरिक्षभौमाश्च पाता
लतलवासिनः ॥ ८६ ॥ शिवपूजासमुद्युक्ता अशुभं नाशयन्तु मे ॥ ये ते
गणा महात्मानो महाबलपराक्रमाः ॥ ८७ ॥ शिवसंपूज्य यत्नेन बलिं ॥ गमः ॥
तेषां विनिःक्षिपेत ॥ ततः सुप्रीतमनसः शांतिंकुर्वंतु मे सदा ॥ ८८ ॥ असमर ॥ ९ ॥

वर्त्तिनामपुरी पूर्वभागेव्यवस्थिता ॥ विद्याधरसमाकीर्णा सिद्धगन्ध
र्वसेविता ॥ ८९ ॥ रत्नप्राकाररुचिरा सर्वरत्नोपशोभिता ॥ तत्रदेवप
तिः श्रीमान्वज्रपाणिर्महाबलः ॥ ९० ॥ नेत्राणांतुसहस्रेण शोभने
नविराजते ॥ ऐरावतगजारूढो हेमवर्णोमहाद्युतिः ॥ ९१ ॥ देवेन्द्रः
सततंहृष्टः परमेशार्चनेरतः ॥ शिवध्यानेनसंपन्नः शिवभक्तिसमन्वि
तः ॥ ९२ ॥ शिवप्रणामपरमः करोतुममशांतिकम् ॥ आग्नेयेदिग्विभागे
तुपरीतेजोवतीशुभा ॥ ९३ ॥ नानादेवसमाकीर्णारत्नज्वालासमुज्वला ॥
तत्रज्वालापरीतांगां ...ज्ञाकारसमद्युतिः ॥ ९४ ॥ भूतिलिप्तदेहिनांदेवोज्वल

॥ श्मशान: पापनाशन: ॥ शिवपूजाजपोधुक्तः शिवस्मरणभावितः ॥ ९५ ॥ शां
॥ १० ॥ तिं करोतु मे देवस्तथा पापपरिक्षयम् ॥ वैवस्वतीनामपुरीदक्षिणेनव्य
वस्थिता ॥ ९६ ॥ असुरासुरशतानीकपितृरक्षोरगालया ॥ तत्रेन्द्रनील
संकाशो रक्तान्तायतलोचनः ॥ ९७ ॥ महामहिषमारूढः कृष्णस्र
ग्वस्त्रभूषणः ॥ अन्तकोथ महातेजाः शिवधर्मपरायणः ॥ ९८ ॥ शि
वपूजासमाधुक्तः क्षेमारोग्यं ददातु मे ॥ नैर्ऋत्यन्तु दिशो भागोपरीह्र (॥ रम: ॥
क्षेति वैश्रुता ॥ ९९ ॥ महारक्षोगणाकीर्णा पिशाचभूतसंकुला ॥ तत्रश्री ॥ १० ॥

मृतसंकाशीरक्तस्रग्वस्त्रभूषणः॥१००॥ खड्गपाणिर्महातेजाः क
रालवदुज्वलः॥ रक्षेंदुनैर्ऋतिर्नित्यं शिवार्चनरतः सदा॥११॥
करोतु मेमहाशांतिं शिवभक्तिसमन्वकः॥ पश्चिमेतु दिशोभागेप्र
शिशुद्धवती शुभा॥२॥ नानागणसमाकीर्णा नानाकिन्नरशोभिता
॥ तत्रमौक्तिकसंकाशः परिपिंगललोचनः॥१२॥ शुक्लवस्त्रपरि
धानः पाशहस्तो महाबलः॥ वरुणः परया भक्त्या शिवैकाहितमान
सः॥१४॥ रोगशोकार्त्तिसंतापं निस्यंनाशयतु प्रभुः॥ वायव्ये दिग्विर

शांति ॥ भागेनपुरीगंधवतीशुभा ॥१५॥ अरबिसिद्धुजलान्तुच्छाहेमञ्जाका
॥ ११ ॥ रत्तोरणा ॥ तत्रताम्रलतादेहनक्लस्पिंगललोचनः ॥ १६ ॥ पठ
व्याघ्रान्तरालीनोध्वजयष्ट्यायुधोघनः ॥ पवनः परमोदेवः
परमेश्वरभावितः ॥ १७ ॥ क्षेमोऽपवलंशांतिंकरोतुसततं
ममः ॥ महोदयानामपुरी उत्तरे रमहोज्वला ॥ ८ ॥ अनेक
पक्षसंकीर्णानानारत्नोपशोभिता ॥ तत्रदेवीगदाहस्तश्चि ॥ एम ॥
त्रस्नग्वस्त्रभूषणः ॥ १९ ॥ ह्रस्वाबाहुर्महातेजाः परिपिंगल ॥ ११ ॥

लोचनः ॥ कुवेरोवरदः श्रीमान हरपादार्चनेरतः ॥ ११० ॥ शांतिं
करोतु मे शांतः प्रीतप्रीतेन तेजसा ॥ यशोवती पुरी रम्या ऐशा-
न्यादिशिमाश्रिता ॥ १११ ॥ नानागणसमाकीर्णा नानासुरकृताल-
या ॥ तेजः प्राकारपर्यंता निरोपम्यामहोदया ॥ ११२ ॥ तत्र-
मौक्तिकसंकाशः शशांककृतभूषणः ॥ त्रिनेत्रः शांतरूपा-
त्मा अक्षमालाधरोहरः ॥ ११३ ॥ ईशानः परमोदेवः सर्वदेवो-
त्तमोत्तमः ॥ सोपिसर्वात्मभावेन शांतिमाशुप्रयच्छतु ॥ ११४ ॥

शा.का. ॥ भूर्लोके च भुवर्लोके स्वर्लोके निवसन्ति ये देवता दिव्यसंयुक्ताः शां
॥१२ ॥ तिं कुर्वन्तु मे सदा ॥ १५ ॥ महर्लोके जनेलोके स्तपलोके स्थिताश्च
ये ॥ तेपि प्रमुदिता देवाः शिवं कुर्वन्तु मे सदा ॥ १६ ॥ सत्यलोके च ये दे
वाः प्रभावोज्ज्वलविग्रहाः ॥ शिवभक्ताः सुमनसोभयं निर्नाशयन्तु
न्तु मे ॥ १७ ॥ गिरिकन्दरदुर्गेषु वनेषु निवसन्ति ये ॥ रुद्रार्चनपरा देवा र
क्षां कुर्वन्तु मे सदा ॥ १८ ॥ महाबलेव सन्निस्मरसातलेषु संस्थिताः ॥ त ॥ त्म
लातलेच ये सन्ति ये सन्ति सुतले जनाः ॥ १९ ॥ वितले संस्थिता भूता ॥ १२ ॥

वितलेनिवसन्तिये॥ तलेचनिलयायेचरक्षांकुर्वन्तुमेसदा॥१२०॥शार
च्चन्द्रांशुगौरेणदेहेनामलतेजसा॥ सरस्वतीशिवेभक्ताशांतिमाशुक॰
रोतुमे॥२१॥ चारुचामीकरच्छायासरोजकरपल्लवा॥शिवभक्ता
तुश्रीदेवीश्रीमद्भूतिंददातुमे॥२२॥ चारुणामुखचन्द्रेणविचित्रकु
सुमोज्ज्वला॥ जयादेवीशिवेभक्तासर्वकामन्ददातुमे॥२३॥ हारेण॰
सुविचित्रेणभास्करोज्ज्वलतेजसा॥ रुद्रसुतापराजिताकरोतुवि
जयंमम॥२४॥ सिन्दूररागरक्तेनवर्णेनायतलोचनः॥सहस्रकी

॥शां·ति·॥ रुणःश्रीमान्सप्तसप्तिस्ववाहनः॥२५॥गभस्तिमालिर्भगवान्शिव
॥१३॥ पूजनेरतः॥करोतुमेमहाशांतिंग्रहपीडानिवारणम्॥२६॥जग
दाप्यायनकरोमृतधारासुशीतलः॥सोमःसौम्येनग्रहपीडाव्यपो
हतु॥२७॥पद्मरागनिभांगेनदेहेनपिंगलोचनः॥अंगारकस्तुस
ततंरुद्रसंपूजनेरतः॥२८॥रुद्रसंभावसंपन्नोरुद्रध्यानैकमानसः॥
ग्रहपीडाभयंसर्वंनिर्णाशयतुमेसदा॥२९॥कुंकुमच्छविदेहेनचापो ॥रामः॥
घतकरःसदा॥शिवभक्तोबुधःश्रीमान्ग्रहपीडांव्यपोहतु॥३०॥ ।१३॥

धातुचामीकरच्छायः सर्वज्ञानकृतालयः ॥ बृहस्पतिः सदाकालमी
शानार्चनतत्परः ॥ ३१ ॥ सोपि शांतेन चित्तेन परमेणसमाधिना ॥ ग्रहपी
डांविनिर्जित्य करोतु विजयं सदा ॥ ३२ ॥ हिमकुंदेंदुतुल्याभः सुरदैत्ये
न्द्रपूजितः ॥ शुक्रः शिवार्चनरतो ग्रहपीडांव्यपोहतु ॥ ३३ ॥ भिन्नाञ्ज
नचयच्छायः संरक्तनयनद्युतिः ॥ शनैश्चरः शिवेभक्तो ग्रहपीडांव्य
पोहतु ॥ ३४ ॥ नीलाञ्जननिभः श्रीमान्सैंहिकेयो महाबलः ॥ शिवपू
जापरो राहुर्ग्रहपीडांव्यपोहतु ॥ ३५ ॥ धूमाकारो ग्रहः केतुरैशान्सां

॥ १४ ॥ दिशिसंस्थितः॥वर्त्तुलोनिचविस्तीर्णोलोचनैश्चसुभीषणः॥३६॥
पलालधूमसंकाशोग्रहपीडापहारकः॥घोरदंष्ट्राकरालीचकरोतु
विजयंमम॥३७॥खड्गखेटकहस्तश्चवरेण्योवरदःशुभः॥शिवम
न्तेश्चाग्रजन्माग्रहपीडांव्यपोहतु॥३८॥एतेग्रहामहात्मानोमहे
शार्चनभाविताः॥शांतिंकुर्वंतुमेहृष्टाःसदाकालंहितेस्थिताः॥३९॥
मुखेयस्यस्थितोमृत्युर्विघ्निर्नामममहाबला॥सन्मुखेविघ्नकारीव॥एषः॥
पृष्ठेचविजयंकरी॥१४०॥ततीयासप्तमीचैवदशमीतुचतुर्दशी॥ १४

चतुर्थीचाष्टमीचैवएकादशीतुपूर्णिमा ॥ ४१ ॥ एतेषुविघ्नपातेषु
कृष्णशुक्लोसमावहा ॥ कुर्वंतुमेलब्धपरः शांतिंचपरमेप्सिताम् ॥ ४२ ॥
अमावास्यामहापुण्यापितृदेवसमन्विता ॥ शांतिंचपरमांपुण्यांशिव
स्यपरमात्मनः ॥ ४३ ॥ शिवतेजःसमायुक्ताकरोतुममशान्तिकम् ॥ प्रति
पच्चमहाशांताद्वितीयाचमनोहरा ॥ ४४ ॥ तृतीयाचतिथीःश्रीमाञ्चतु
र्थीचमहायशाः ॥ पञ्चमीनामशांतात्माषष्ठीचातिथिरुत्तमा ॥ ४५ ॥
सप्तमीचतिथिःपुण्याअष्टमीचमहावला ॥ तिथिःप्रल्नम्नत्रश्चैवापा

॥ शां॰का॰ ॥ पहापरमास्मृताः ॥ ४६ ॥ नवमी तिथिरस्त्रग्रा दुर्गायाः परिकीर्त्तिता ॥ ८

॥ १५ ॥ शमी शोभना चैव तिथिरेकादशी तथा ॥ ४७ ॥ द्वादशी चैव शांतात्मा त

था तिथिस्त्रयोदशी ॥ चतुर्दशी महावीर्या तिथिः शंकरजन्मदा ॥ ४८ ॥

पूर्णिमा परिपूर्णात्मा तिथिस्त्वेसततोज्ज्वला ॥ सततं तु शुभात्मानस्तिथ

यश्च क्रमेण तु ॥ ४९ ॥ पक्षद्वये सदा ह्येते चन्द्रस्यास्यानुगामिनः ॥ शांतिं

कुर्वन्तु मे नित्यं शिवाज्ञानुविधायिनः ॥ १५० ॥ विष्कुंभः प्रीतिरायुष्मान् ॥ राम: ॥

सौभाग्यः शोभनस्तथा ॥ अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥ १५ ॥

॥ ५१ ॥ गंडो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥ वज्रः सिद्धिर्व्यती
पातो वरीयान्परिघः शिवः ॥ ५२ ॥ सिद्धिः साध्यः शुक्लो ब्रह्मा ऐन्द्र
श्च वैधृतिः ॥ कथ्यमानो योगाश्चैते महाबलाः ॥ ५३ ॥
शिवभक्तिपराः सर्वे शिवज्ञानविधायिनः ॥ शांतिं कुर्वन्तु मे नित्यं तथा
किल्बिषनाशनम् ॥ ५४ ॥ कृत्तिका परमा देवी रोहिणी रुचिरानना
॥ श्रीमन्मृगशिरा भद्रा आर्द्रा च परमोज्ज्वला ॥ २५ ॥ पुनर्वसुस्तथा
पुष्य अश्लेषा च महाबलाः ॥ नक्षत्रमातरो ह्येताः प्रभामालावि

॥ह्रां.का॥ भूषिता: ॥ १८॥ महादेवार्च्चनेशक्ता महादेभानुभाविता: ॥ पूर्व्वभा
॥ १९ ॥ गेस्थिताह्येता: शांतिंकुर्व्वन्तुमेसदा ॥ ५७ ॥ मघासर्व्वगुणोपेता।
पूर्व्वाचैवतुफल्गुनी ॥ उत्तराफल्गुनीश्रेष्ठा हस्ताचित्रातथोत्तमा ॥ ५८ ॥
स्वातिविशाखावरदादक्षिणस्थानसंस्थिता ॥ अर्च्चयन्तिसदाका
लंदेवित्रिभुवनेश्वरम् ॥ ५९ ॥ नक्षत्रमातरोह्येतातेजसापरिभूषिता
॥ ममापिशांतिकंनित्यंकुर्व्वन्तुशिवचोदिता: ॥ ६० ॥ अनुराधातथा ॥ एमः॥
ज्येष्ठामूलंदृढव्रिवलान्वितम् ॥ पूर्व्वषाढामहावीर्याआषाढाचोत्त ॥ १५॥

राशुभा ॥ ६१ ॥ अभिजिन्नामनक्षत्रं श्रवणापरमोज्ज्वला ॥ एताः प
श्चिमतोदीप्ता राजन्ते राजमूर्त्तयः ॥ ६२ ॥ ईशान्यांभूजयस्येताः स
दाकालंविभाविताः ॥ ममशांतिंप्रकुर्वन्तुविभूतिभिः समन्विताः
॥ ६४ ॥ धनिष्ठाशतभिषाचैवपूर्वभाद्रपदातथा ॥ उत्तराभाद्ररेवत्या
श्विनीचमहर्द्धिकाः ॥ ६५ ॥ भरणीचमहावीर्यानित्यमुत्तरतःस्थि
ताः ॥ शिवार्चनरतानित्यंशिवध्यानैकमानसाः ॥ ६७ ॥ शांतिंकुर्वन्तु
मेनित्यंसर्वकालशुभोदया ॥ मेषोराशिमुखः सिंहोधनुर्दीप्तिमतोवै

शां॰का ॥ पूर्वभागे स्थितायेते शिवपूजापरायणा : ॥ शांतिं कुर्वंतु मे नित्यं
॥ १७ ॥ शिवभक्तिसमन्विता: ॥ १८ ॥ वृषश्च कन्या देवी च मकरस्वातिवु
द्धिमान् ॥ एते दक्षिणभागेन पूजयंति सदा शिवम् ॥ १९ ॥ भक्त्या
परमया नित्यं शांतिं कुर्वंतु मे सदा ॥ मिथुनश्च तुला कुम्भः पश्चि
मेन व्यवस्थिता: ॥ २१ ॥ शिवपादार्चनपरा: क्षेमं कुर्वंतु मे सदा ॥
कर्कटो वृश्चिको मीन एते ह्युत्तरतः स्थिता : ॥ २२ ॥ पूजयंति सदा
कालरुद्रं भुवननायकम् ॥ शांतिं कुर्वंतु मे नित्यं शिवाज्ञानुवर्ति

३४ शां॰ ॥ २३ ॥

वव श्च बालव श्चैव कौरवस्तैतिलस्तथा ॥ गरैव णिकस्तथाविष्टि
श्च जुष्याच्छकुनिस्तथा ॥ ७४ ॥ नागकिंस्तुघ्न इत्येवं कारणाः शि
वभाविताः ॥ सर्वेषु ज्ञीतमनसा शांतिं कुर्वंतु मे सदा ॥ ७५ ॥ जन्म
सम्पद्विपत्क्षेमं प्रत्यारिः साधकोवधः ॥ मंत्रंचपरममैत्रंनवैत्ते
तारकारणाः ॥ ७६ ॥ शिवभक्ता महात्मानः कुर्वंतु मम शांतिकम् ॥
ऋषयः सप्तविख्याता ध्रुवान्नाः परमोज्ज्वलाः ॥ ७७ ॥ शिवप्रसा
दसम्पन्नाः शांतिं कुर्वंतु मे सदा ॥ काश्यपो गालवो गार्ग्यो विश्वा

शां.का. ॥ मित्रो महामुनिः ॥ ७७ ॥ मनुर्दक्षो वशिष्ठोथ मर्कण्डुः पुलहः क्रतुः

॥ १६ ॥ असितो वालखिल्याश्च दुर्वासाः पिप्पलादयः ॥ ७८ ॥ ऋचीको भल्लो

गल्वः पराशरो विभाण्डकः ॥ मातङ्गो जैमिनिर्व्यासो देवलो धर्मलो

मकः ॥ ७९ ॥ भाण्डव्यश्च दधिचिश्च मार्कण्डेयोथ गौतमः ॥ नारदोथ

गुरात्रेयो भारद्वाजोङ्गिरा मुनिः ॥ ८० ॥ वाल्मीकिः कौशिकः खण्वः शा

कल्योथ पुनर्वसुः ॥ शालंकायनस्त्वाघाऋषयोथ महाव्रताः ॥ ८१ ॥ शि ॥ एमः ॥

वध्यानार्वनोघ्युक्ताः शांतिं कुर्वन्तु मे सदा ॥ कपत्न्यो महापुण्यास्तथा ऋ ॥ १६ ॥

षिकुमारकाः॥ ८२॥ शिवार्चनपरानित्यंशांतिंकुर्वंतुमेसदा॥ सिद्धाः
संसिद्धतपसोगणाविद्याधरास्तथा॥ ८३॥ महात्मानोमहोत्साहा
गरुडाश्चमहर्द्धिकाः॥ महेश्वरपराएतेमहेशपादपूजकाः॥ ८४॥
सिद्धिमाशुप्रयच्छन्तुआशीर्वादपरायणाः॥ नमुचिर्दैत्यराजेन्द्रः
शंकुकर्णोमहाबलः॥ ८५॥ महादानोथविख्यातोदैत्यःपरमवी
र्यवान॥ हाटकेश्वरदेवस्यनित्यंपूजापरायणाः॥ ८६॥ बलंवी
र्यंचमेनित्यंप्रयच्छन्तुमहर्द्धिकाः॥ महाजंभोहयग्रीवः प्रह्लादो

॥ शां-का ॥ व्यक्त ह्रादकः ॥ ८७ ॥ तारकोग्निमुखो दैत्यः कालनेमिर्मदो
॥ १९ ॥ त्कटः ॥ एते दैत्या महात्मानः शिवसद्भावभाविताः ॥ ८८ ॥ बलंसु
षिं तथा वीर्यं त्र्यम्बकत्तु सुखोदयम् ॥ विरोचनो हिरण्याक्षः सु
पर्वा च सुलोमकः ॥ ८९ ॥ मुचुकुन्दः मुकुन्दश्च दैत्यो रैवतकस्त
था ॥ भावेनैव परेणाशु यजन्ते सर्वदा शिवम् ॥ ९० ॥ सततं च
महात्मनः पुष्टिं कुर्वन्तु मे सदा ॥ दैत्यपत्न्यो महाभागा दैत्यानां ॥ एताः ॥
कन्यकाः शुभाः ॥ ९१ ॥ कुमार्यश्चैव दैत्यानां शांतिं कुर्वन्तु मे स ॥ २९ ॥

दा ॥ आरक्तेन शरीरेण रक्तान्तायतलोचनः ॥ ९२ ॥ महाभोग
फणाटोपः शङ्खाङ्कितलाञ्छनः ॥ अनन्तो नागराजेन्द्रः शि
वपादार्चने रतः ॥ ९३ ॥ महापापविषं हित्वा शान्तिमाशुकरोतु मे
॥ शुभ्वेतेन वपुदेहेन शुभ्वेतोत्पलशेखरः ॥ ९४ ॥ चारुभोगफणाटो
पश्चारुहारविभूषणः ॥ वासुकी नागराजेन्द्रो रुद्रपूजापरो म
हान् ॥ ९५ ॥ महापापभयं हत्वा शान्तिमाशुकरोतु मे ॥ अति
पीतेन देहेन विस्फुरद्भोगसंपदा ॥ ९६ ॥ तेजसा चातिदीप्तेन

शां·का॥ कृतस्वस्तिकलाञ्छनः॥ नगराट्तक्षकः श्रीमान्नागकोना
॥ २० ॥ समन्वितः॥ करोतु मे महाशान्तिं सर्वदोषविषापहम् ॥ अ
तिकृष्णेन वर्णेन स्फुटो विकटमस्तकः ॥ ९८ ॥ कण्ठे रेखात्र
योपेतो घोरदंष्ट्रायुधोद्यतः ॥ कर्कोटको महानागो विषदर्प
वलान्वितः ॥ ९९ ॥ विषशस्त्राग्निसंतापं हत्वा शांतिं करोतु
मे ॥ पद्मवर्णेन देहेन चारुरूपप्रायतेक्षणः ॥ १०० ॥ पञ्चबिन्दु ॥ राम॥
कृताभासो ग्रीवायां शुभलक्षणः ॥ ख्यातः पद्मो महानागोह ॥ २० ॥

रपादार्चनेरतः ॥ २०१ ॥ करोतु मे महाशांतिं महापापविषक्ष
म् ॥ पुण्डरीकनिभेनापि देहेनामिततेजसा ॥ २०२ ॥ शंखभूला
ङ्करुचिरैर्भूषितो मूर्ध्नि सर्वदा ॥ महापद्मो महानागो नित्यं प
शुपतेर्नतः ॥ २०३ ॥ विनिष्कष्य विषं घोरं शांतिमाशु करोतु मे ॥
श्यामेन देहभारेण श्रीमत्कमललोचनः ॥ २०४ ॥ विषदर्पव
लोन्मत्तो ग्रीवायामेकरेखया ॥ शंखपालश्रियाढ्योऽसौ शिव
पादाब्जपूजकः ॥ २०५ ॥ महाविषं महापापं हत्वा शांतिं करोतु मे ॥

शां॰ का॰ ॥ अतिघोरेणदेहेनचन्द्रार्द्धकृतमस्तकः ॥ २६ ॥ दीप्तभोगकृताटोपः
॥ २१ ॥ शुभलक्षणलक्षितः ॥ कुलिकोनागराजेशोनित्यंहरपरायणः
॥ २७ ॥ अपहृत्यविषंघोरंकरोतुममशांतिकम् ॥ अन्तरिक्षेचये
नागायेनागाःस्वर्गसंस्थिताः ॥ २८ ॥ गिरिकन्दरदुर्गेषुयेनागा
भुविसंस्थिता ॥ पात्तालेयेस्थितानागाःसर्वेपत्रसमाहिताः ॥ २९ ॥
रुद्रपादार्चनेशक्ताः कुर्वंतुममशांतिकम् ॥ नागिन्योनागकन्या ॥ एमः ॥
श्चतथानागकुमारकाः ॥ ३० ॥ शिवभक्ताःसुमनसःशांतिंकुर्वंतु ॥ ३१ ॥

मेसदा ॥ यईदंनागसंस्थानंकीर्त्तयेच्छृणुयादपि ॥ २११ ॥ नतस्य
सर्पाद्भींसंतिनविषंक्रमतेसदा ॥ गंगापुण्यामहादेवीयामुना
नर्मदानदी ॥ १२ ॥ गोमतीचापिकावेरीवरुणादेवीकातथा ॥ सर्व
भूतपतिंदेवंपरमेशंमहेश्वरम् ॥ १३ ॥ पूजयंतिमहानद्यःशिस
द्भावभाविताः ॥ शांतिंकुर्वंतुमेनित्यंतथापापपरिक्षयम् ॥ १४ ॥
सिद्धिमाशुप्रयच्छन्तुसर्वविघ्नविवर्जिता ॥ चन्द्रभागामहापुण्या
नदीगोदावरीशुभा ॥ १५ ॥ सरयूगण्डकीश्रेष्ठाकौशिकीचसरस्वती ॥

॥ शां॰का॰ ॥ एतानद्योमहाभागाः शिवपादार्चनेरताः ॥ २१६ ॥ शांतिंकुर्वन्तुमे
॥ २२ ॥ प्रीताः शिवध्यानैकमानसाः ॥ नैरञ्जनानामनदीशोणश्चापिम
हानदः ॥ १७ ॥ मन्दाकिनीचपरमातथाशान्तिहिताशुभाः ॥ सिन्ध्रु
विपाशाचनदीलोहितश्चमहानदः ॥ १८ ॥ महाह्रदास्तथावेत्री
तथावैतरणीनदी ॥ एताश्चान्याश्चवहवोभूम्निदिव्यान्तरिक्ष
गाः ॥ १९ ॥ रुद्रार्चनपरानघ्यः कुर्वन्तुममशांतिकम् ॥ महावैश्रवणोदेवो ॥ एम॰ ॥
यक्षराजोमहर्द्धिकः ॥ २२० ॥ यक्षकोटिपरिवारैयक्षसंख्येनसंयुतः ॥ २२ ॥

महाविभवसंपन्नोहरपादार्च्चनेरतः ॥२१॥ हरध्यानैकपरमोहर
पादनतोत्तमः ॥ शांतिंकरोतुमेप्रीतः पद्मपत्रायतेक्षणः ॥२२॥ म
णिभद्रोमहायक्षोमणिरत्नविभूषितः ॥ मनोहरेणहारेणकण्ठ
लग्नेनराजते ॥२३॥ यक्षिणीयक्षकन्याभिः परिवारितविग्रहः ॥
हद्रार्चनपरोयक्षः करोतुममशांतिकम ॥२४॥ सुवीरोनामयक्षेन्द्रो
मणिकुण्डलभूषितः ॥ ललाटेहेमपट्टेन शोभनेनविराजते ॥२५॥
वहुयक्षसमाकीर्णोयक्षैर्नमितविग्रहः ॥ शिवपूजापरोभक्तः करो

शां॰का॰ तु मम शांतिकम् ॥ २६ ॥ पक्षिकोनाम यक्षेन्द्रः स्फटिकाकण्ठको
२३ ज्वलः ॥ हारेणासुविचित्रेण केयूराभ्यां विराजते ॥ २७ ॥ यक्षसंघैः
समायुक्तो यक्षकोटिसमावृतः ॥ हरार्चनपरः श्रीमान् करोतु म
मशांतिकम् ॥ २८ ॥ श्रीमान विभाण्डको यक्षो नानारत्नविभूषि
तः ॥ बाहराणकुण्डलेन्दुर्णकर्णो नित्यं विराजते ॥ २९ ॥ यक्षेश्व
रो यक्षपतिर्यक्षसेनापतिर्ध्रुवः ॥ हरपादार्चकः श्रीमान् करोतु म ॥ राम॰
मशांतिकम् ॥ ३० ॥ घनतरश्रुतो महानेजा यक्षो यक्षाधिपः प्रभुः ॥ २३ ॥

दिव्यपद्मशुकच्छन्नोमणिकाञ्चनभूषितः ॥३१॥चन्द्रसंपन्नप
द्देनदेहेनापिविराजते॥यक्षकोटिसहस्रैस्तुपरिवारितविग्रहः
॥३२॥शिवभक्तःशिवध्यानशिवपूजापरायणः॥शिवप्रसादसंप
न्नःकरोतुममशांतिकम्॥३३॥पूर्णभद्रोमहायक्षःसर्वालंकारभू
षितः॥रत्नप्रदीपपद्देनहेम्नातीवविराजते॥३४॥यक्षकोटि
सहस्रेणपरिवारेणसंयुतः॥रुद्रार्चनसमायुक्तःकरोतुमम
शांतिकम्॥३५॥विरूपाक्षश्चयक्षेन्द्रःश्वेतवासामहाद्युतिः॥

शां.का. ॥ वाहकाश्च नवर्णाभिः किंकिणीभिः समन्वितः ॥ २६ ॥ भूषितश्च स
॥ २४ ॥ दाकालंवरदानेकतत्परः ॥ रुद्रपूजापरो भक्तः करोतु मम शांतिकम्
॥ ३० ॥ अन्तरिक्षगता यक्षा ये यक्षाः स्वर्गवासिनः ॥ गिरिकन्दरदु
र्गेषु ये यक्षा भूविवासिनः ॥ ३१ ॥ अन्तरीक्षे च ये यक्षाः पातालतल
वासिनः ॥ नानारूपायुधा यक्षा नानावेषधरास्तथा ॥ ३२ ॥ शिवभ
क्ताः सुमनसः शिवपूजासमत्सुका ॥ शांतिं कुर्वन्तु मे दृष्टाः शांताः शां ॥ रम
तिपरायणाः ॥ ३३ ॥ पक्षिरूपा विविधाकारास्तथा यक्षकुमारकाः ॥ २५ ॥

यक्षरक्षकन्यामहाभागाःशिवपूजार्चनेरताः॥ ४० ॥शांतिंस्व
स्त्ययनंक्षेमंबलंकल्याणमुत्तमम॥ सिद्धिंचायुश्चयच्छन्तुनित्य
मेवसमाहिताः॥ ४१ ॥मेरुमंदरकैलाशोमलयोगन्धमादनः॥श्री
पर्वतोमहेन्द्रश्चहेमकूटस्तथैवच॥ ४२ ॥पर्वताःसर्वतःसर्वेपर्वता
श्चमहर्द्धिकाः॥ शिवभक्ताःसदाकालंक्षेमंकुर्वन्तुमेसदा॥ ४३ ॥
जंबूद्वीपःप्लक्षद्वीपःशाल्मलिःकुशद्वीपकः॥ क्रौंचद्वीपःशाक
द्वीपोगोमेदोद्वीपकोमहान्॥ ४४ ॥पुष्करस्तुमहाद्वीपस्तेद्वीपाम

शां॰ का ॥ हर्द्धिकाः ॥ रुद्रभक्तिरताः सर्वे शान्तिं कुर्वन्तु मे सदा ॥ ४५ ॥ क्षारो
॥ २५ ॥ दकश्च क्षीरोदो दध्नोघृतोदयेव च ॥ सुरोदः स्वादूदकश्चई
क्षुस्वादस्तथैव च ॥ ४६ ॥ सप्तसमुद्रनामा च ः कुर्वन्तु मम शान्ति
कम् ॥ राक्षसाः सर्वतः सर्वे राक्षसा घोररूपिणः ॥ ४७ ॥ राक्ष
सा ये महावीर्या राक्षसाश्च महाबलाः ॥ स्थूलस्थाः राक्षसा ये तु
अन्तरिक्षे च राक्षसाः ॥ ४८ ॥ पाताले भूतले ये च नित्यं रुद्रपराय ॥ रामः भ
णाः ॥ भैरवं यस्य रूपन्तु पश्येत भस्मावगुण्ठितम् ॥ ४९ ॥ तेजसा त ॥ २५ ॥

स्य देवस्य शांतिं कुर्वंतु मे सदा ॥ नित्यमुज्ज्वलवेषेण योगिन्यो
थ महाबला: ॥२५०॥ रूपिण्यो विविधाकारा डाकिन्यश्च महो
ड्डिका: ॥ रुद्रध्यानमनिरत्ता रुद्रपादार्चने रत्ताः ॥५१॥ रुद्रे काहि
त चेतस्का: कुर्वन्तु मम शांतिकम ॥ अन्तरिक्षगता याश्च डाकिन्य:
स्वर्गसंस्थित्ता: ॥ ५२॥ पाताले यास्तु डाकिन्यो गिरिदुर्गेषु या स्थि
ता: ॥ तृतीयं लोचनं यस्य त्रिशूलं मस्म भासुरम ॥ ५३॥ तेजसा तु
स्य देवस्य शांतिं कुर्वंतु मे सदा ॥ सर्वे भूत्ता महारूपा: सर्वे भूत्ता महो

॥शां॰का॥ ज्वलता: ॥५४॥ सर्वेभूता:स्थिता:सौम्यास्सर्वेभूतामनोजवा: ॥
॥२६॥ अन्तरिक्षेचयेभूतायेभूतादिविसंस्थिता: ॥५५॥ पातालेभूतलेये
चभूताभूतिविधायका: ॥ खड्गंगंविमलंयस्यत्रिशूलंभस्मभासुरम्
॥५६॥ तेजसातस्यदेवस्यशांतिंकुर्वंतुमेसदा ॥ प्रेताप्रेतगणा:सर्वेयेप्रे
ता:सर्वतोमुखा: ॥५७॥ अतिदीर्घाश्चयेप्रेतायेप्रेतारुधिराशना: ॥ अं
तरिक्षेचयेप्रेतायेप्रेतास्वर्गवासिन: ॥५८॥ पातालेभूतलेप्रेतायेप्रे ॥ एम: ॥
ता:कामरूपिण: ॥ श्मशानेनिलयोयस्यवृषभोयस्यवाहन: ॥५९॥ २६ ॥

तेजसातस्यदेवस्यशांतिंकुर्वन्तुमेसदा ॥ येपिशाचामहावीर्याश्च
ह्निमन्तोमहावला ॥२६० ॥नानारूपधराःसर्वेचगुणविस्तराः ॥ अ
न्तरिक्षेपिशाचायेस्वर्गेयेचपिशाचकाः ॥२६१ ॥भूपातालेपिशा
चायेवहुरूपामनोजवाः ॥ चन्द्रार्द्धमस्तकेयस्यगङ्गायेनजटा
धृता ॥२६२ ॥तेजसातस्यदेवस्यशान्तिंकुर्वन्तुमेसदा ॥ अपस्मार
ग्रहाःसर्वेसर्वेचापिज्वरग्रहाः ॥ ६३ ॥गर्भवालग्रहायेतुनानारो
गग्रहाश्चये ॥ अन्तरिक्षेग्रहायेतुस्वर्गेयेतुग्रहोत्तमाः ॥ ६४ ॥ भू

॥ शां॰ का॰ ॥ पाताले ग्रहायेतु ये ग्रहाः सर्वतोदिशः ॥ करोठपस्यमहानीलंभ
॥ २७ ॥ षणांयस्यपन्नगः ॥ ६५ ॥ तेजसानस्यदेवस्य शांतिंकुर्वंतुमेसदा ॥
इतिदेवादयः सर्वे शिवाज्ञानुविधायिनः ॥ २६६ ॥ कुर्वंतुजगतः
शांतिंशिवभक्तेषुसर्वदा ॥ जयात्मयोगसंस्थायजयसंशुद्धचेत
से ॥ ६७ ॥ जयदानैकभूराय जयेशायनमोस्तुते ॥ जयोत्तमायदेवा
य जयकल्याणकारिणे ॥ ६८ ॥ जयप्रकटदेहाय जयज्ञाप्यायते ॥ नमः ॥
नमः ॥ जयलक्ष्मीनिधानाय जयकान्तिविधायिने ॥ ६९ ॥ जयवा ॥ २७ ॥

कायविशुद्धाय अजिताय नमो नमः॥ जय ज्ञानविशुद्धाय सर्वव्या
पिन्नमोस्तुते॥ २७०॥ जय सर्वाय शुद्धाय चाष्टमूर्त्तेनमो नमः॥
जय त्रिशूलहस्ताय जय खट्वाङ्गधारिणे॥ २७१॥ जय निर्जितलो
काय जय रूपाय ते नमः॥ जय कान्तार्द्धदेहाय जय चन्द्रार्द्धधारि
णे॥ २७२॥ जय देवाधिदेवाय जय रुद्राय ते नमः॥ जय त्रिभुवने
शाय जय विख्यातकर्मणे॥ २७३॥ जय धाराय सर्वाय जय कर्त्ते न
मो नमः॥ जय मोक्षप्रदानाय सृष्टिसंहारकारिणे॥ २७४॥ ब्रह्मवि

नि १

॥ शा० का० ॥ ह्रिबन्दुवन्द्याय शिवशांतनमोस्तुते ॥ इत्येवंशांताध्यायंयःपठेच्छु
॥ २८ ॥ णुयाद ॥ २७५ ॥ सविधूयाश्रुपापानि शिवलोकेमहीयते ॥ कन्यार्थील
भतेकन्यांजयकामोजयंलभेत् ॥ २७६ ॥ अर्थकामोलभेदर्थान्पुत्रका
मःपुत्रान्बहून् ॥ विद्यार्थीलभतेविद्यांयोगार्थीयोगमाप्नुयात् ॥ २७ ॥
यांयांप्रार्थयतेकामान्मानवश्रवणादिह ॥ तत्सर्वंशीघ्रमाप्नोति दे
वानाञ्चप्रियोभवेत् ॥ २७७ ॥ शांत्यध्यायंपठन्यस्तुसंग्रामंप्रविशेन्न ॥ एम्यः
रः ॥ सनिर्जित्याहवेशत्रून्कल्याणैःपरिपूर्यते ॥ २७८ ॥ अक्षयांमो ॥ २८

दत्ते कालमतिरस्कृतशासनः ॥ व्याधिभिर्नाभिभूयेत पुत्रपौत्रप्रति
ष्ठितः ॥ २८० ॥ पठ्यमानमिदं पुण्यं यस्तु द्विश्य च पठ्यते ॥ न तस्य रोगा बा
धन्ते वातपित्तादिसंभवाः ॥ २८१ ॥ नाकाले मरणं तस्य न सर्पैश्चापि द
ष्यते ॥ न विषं क्रमते देहे न जडत्वांध्यमूकता ॥ २८२ ॥ नोपसर्गभयं त
स्य नोत्पातस्य भयं भवेत् ॥ नाभिचारकृतैर्दोषैर्लिप्यते स कदाचन ॥ २८३ ॥
यत्पुण्यं सर्वतीर्थानां गंगादीनां विशेषतः ॥ तत्पुण्यं कोटिगुणितं
प्राप्नोति श्रवणादिह ॥ २८४ ॥ दशानां राजसूयानामग्निष्टोमशतस्य च

॥शां का॰॥श्रवणात्फलमाप्नोतिकोटिकोटिगुणोत्तरम्॥८५॥अवध्यःसर्व
॥२९॥देवानामन्येषांचविशेषतः॥जीवेद्वर्षशतंसाग्रंसर्वव्याधिविवर्जि
तः॥२८६॥गोघ्नश्चैवकृतघ्नश्चब्रह्महागुरुतल्पगः॥शरणागतघा
तीचमित्रविश्रंभघातकः॥२८७॥दुष्टपापसमाचारोमातृहापितृहा
तथा॥श्रवणात्तस्यभावेनमुच्यतेसर्वपातकैः॥२८८॥शांत्यध्यायमिदं
पुण्यंनदेयंयस्यकस्यचित्॥शिवभक्तायदातव्यंशिवेनकथितंपुरा॥एमः॥
॥२८९॥इतिश्रीशिवधर्मशास्त्रेनन्दिकेश्वरप्रोक्तेशांत्यध्यायःसमाप्तः॥ ॥२९॥



CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi